परिशिष्टम्

एकवर्णार्थसंग्रहः ।

श्रीरामः शरणम् ।

नमस्कृत्य शिवं वैद्यगौराङ्गमल्लिकात्मजः ।
भरतः कुरुते पद्यै रेकवर्णार्थसंग्रहम् ॥ १ ॥*
न हलः केवलस्यास्ति उच्चारणमिति स्वरैः ।
अन्तःस्थैर्श्चैकता तस्य मता कक्कादयोयथा ॥ २

स्वरवर्णकोषः ।

अः श्रीपतौ वर्त्ततेऽर्थे स्वल्पार्थप्रतिषेधयोः ।
अभावेऽप्यनुकम्पायामव्ययमुदीरितम् ॥ ३
आ ब्रह्मण्यव्ययं तु स्मृतौ वाक्यसमुच्चये ।
समायामपि कात्स्न्यस्वल्पार्थाभिविधिष्वपि ॥ ४
उपसर्गाख्य आ-शब्दः समन्तादीषदर्थयोः ।
प्रत्याहत्तिर्ग्रहादीनां चार्थानां धातुयोगतः ॥ ५
आख्यापको भवेदिस्तु कुसुमायुध उच्यते ।
इ अव्ययं क्रुधोक्तौ स्यात्खेदानुकम्पयोरपि ॥ ६
ई लक्ष्मीः स्यादव्ययं तु विषादे करुणारुषोः ।
उः शिवे स्यादव्ययं तु अनुकम्पानियोगयोः ॥ ७
सम्बोधने रुषोक्तौ च पादपूरण इष्यते ।
ऊरक्षायामव्ययं तु वाक्यारम्भानुकम्पयोः ॥ ८
ऋकारो देवतायामव्ययं वाक्यनिन्दयोः ।
ऋदैत्यजननी वाक्यकुत्सयोर्ऋ-तु अव्ययम् ॥ ९

ऌकारो देवयोनिः स्यात् ऌमाता सद्भिरुच्यते ।
एर्विष्णुः स्यादव्ययं तु स्मृतामन्त्रणहूतिषु ॥ १०
ऐः शम्भुः स्यादव्ययं तु स्मृतामन्त्रणहूतिषु ।
ओकारः स्यादजयोनिरव्ययं स्मरणे तथा ॥ ११
आह्वाने चानुकम्पायां तथा सम्बोधने मतम् ।
औरन्ते स्यादव्ययं तु हूतौ सम्बोधनेऽपि च ॥ १२
अं भवेत् परमं ब्रह्म अः स्याद्विष्णुत्रिनेत्रयोः ॥ १३

इति स्वरवर्णकोषः ।

अथ व्यञ्जनवर्णकोषः ।

कः पुमान् ब्रह्म वाय्वात्मसूर्याग्नियमवर्हिषु ।
दक्षः प्रकाशयोः कं तु शीर्षे वारिणि शर्म्मणि ॥ १
कुर्धरित्री स्त्रियामुक्ता क्वव्ययं पापकुत्सयोः ।
निवारणे विनिर्दिष्टमीषदर्थे च कोविदैः ॥ २
खमाकाशेन्द्रियक्षेत्रदेवलोकेषु शर्म्मणि ।
संवेदने शून्यबिन्दौ प्रकाशपूरयोर्मतम् ॥ ३
गो-गणेशे गन्धवाहे गन्धर्व्वे गीतिगानयोः ।
गा-गाथायां गदायाञ्च गौः पुमान् वृषवज्रयोः ॥ ४
स्वर्गे रश्मौ चन्द्रमसि स्त्रियान्तु दिशि वाचि च ।
दृक् सौरभेयी बाणेषु सलिले धरणावपि ॥ ५ ।
[illegible] दृष्ट्यां मतोऽत्रन्तु गर्हणे वर्हणेऽपि च ।
[illegible] कीर्त्तिता ॥ ६
[illegible] ।
चश्चौरश्चन्द्रमाश्चोतश्चं चक्रे चन्दने स्मृतम् ॥ ७
चाऽव्ययं स्यात् समाहारेऽप्यन्योन्यार्थे समुच्चये ।
अन्वाचये तथा पादपूरणेऽप्यवधारणे ॥ ८

पक्षान्तरेऽपि, छस्तु स्याच्छेदने निपु निर्म्मले ।
जवने तरलेऽप्येवं छा-तु वेदध्वनौ मता ॥ ९
जःस्याज्जेतरि विज्ञाते जवने च प्रयुज्यते ।
जूः स्यादाकाशे सरस्वत्यां पिशाच्यां जवनेऽपि च ॥१०
झोझञ्झावात उद्दिष्टस्तथा नष्टोऽपि पण्डितैः ।
ञः स्यात् घर्घरशब्देऽपि गायने शासने दिवि ॥ ११
टः स्यात् शब्दे कवन्धे च टा पृथिव्यां प्रकीर्त्तिता ।
ठः स्यान्महाध्वनौ शून्ये शङ्करे चन्द्रमण्डले ॥ १२
ठा ध्वनौ डः शिवे त्रासे शब्दे च परिकीर्त्त्यते ।
ढो-ढक्कायां निर्गुणे च ध्वनिनिर्णययोरपि ॥ १३
णः प्रकर्षे निर्वृतौ च ज्ञाननिश्चयोरपि ।
तस्तु सुरे युद्धवद्धवर्गेषु क्रोड़ पृष्ठयोः ॥ १४
त्वव्ययं स्यात् प्रशंसायां पक्षान्तरनियोगयोः ।
भेदेऽवधारणे पादपूरणेऽपि समुच्चये ॥ १५
विनिग्रहे थस्तु शैले थथृ द्वौ हयलक्षणे ।
दो दाता दं कलत्रं स्यात् दा दाने च्छेददात्रषु ॥ १६
धो धर्म्मो धर्म्मराजोऽपि धाताधीरोधनाधिपः ।
धूर्धूर्त्तं इन्द्रिये कर्म्म चिन्तनेऽपि प्रकीर्त्त्यते ॥ १७
नः स्याद्बुद्धेऽपि विप्रेऽथो ऽप्यमाप्रतिषेधयोः ।
अव्ययं न समुद्दिष्टं आनुवन्धस्तु न ध्वनिः ॥ १८
अभावे च निषेधे च स्वरूपार्थे व्यतिक्रमे ।
ईषदर्थे सादृश्ये च तद्विरुद्धतदन्ययोः ॥ १९
अप्राशस्त्येऽप्यव्ययं न निषेधाभावयोः स्मृतम् ।
अव्ययं निर्निषेधे स्यात् स्मार्थे संशयेऽपि च ॥ २०
नित्यार्थे कौशले दोषे विरामेऽन्तिकदानयोः ।
राश्यधोभागविन्यासे मोक्षान्तर्भाववन्धने ॥ २१

आश्चर्येऽप्युपमर्गाख्ये निर्निमित्तेऽपि निश्चये ।
नीः स्यान्नरि नीतौ च नुः स्तुतौ परिकीर्तितः ॥ २२
न्वव्ययं तु वितर्के स्यादुपमा प्रश्नयोरपि ।
विकल्पेऽनुनयेऽतीते पश्चात्पूर्वेऽत्ययोः ॥ २३
न्वन्तः पण्डितेऽर्थे पुरुषेऽपि प्रयुज्यते ।
नो अव्ययमभावे स्यान्नौर्नौकायां प्रयुज्यते ॥ २४
पः पातकेऽपि पवने भवेत् पाः पानपानयोः ।
फो झञ्झावात फुत्कार दके निष्फल भाषणे ॥ २५
फिः प्रकोपे मतौ बः स्याद्वरुणे वर्व्वरे घटे ।
इवार्थे त्वव्ययं व स्यादव्ययं वा समुच्चये ॥ २६
उपमायां विकल्पे च नानार्थातोनयोरपि ।
एवार्थे च वितर्के च विशिष्टे पादपूरणे ॥ २७
विः स्यात् पक्षिण्यव्ययं वि वियोगपादपूरणे ।
विच्छेदे निश्चये हेतौ विग्रहे सहने तथा ॥ २८
ईषदर्थ्याभिमुख्या लब्धनाभिभवेषु च ।
वि ज्ञानातीतयानार्थस्वेच्छार्थेषु प्रयुज्यते ॥ २९
उपसर्गेऽव्ययं विः स्यान्नजर्थे गमने तथा ।
विशेषदानवैरूप्येऽव्ययं वै पादपूरणे ॥ ३०
सम्बोधने चानुनये हेतावप्यवधारणे ।
भः स्याद्दैत्य गुरौ भङ्गे मयूरे भस्म च स्मृतम् ॥ ३१
भा दीप्तौ च गभस्तौ च भीर्भये समुदाहृता ।
भूः स्थानमात्रे भूमौ च तथोत्पत्तौ प्रयुज्यते ॥ ३२

मः स्याद्ब्रह्मणि चन्द्रे च चन्द्रशेखरमन्त्रयोः।
मं मङ्गलं समुद्दिष्टं मा पद्माविद्ययोर्युतौ॥ ३३
मा स्यान्मातरि माने चाव्ययं मा वारणे तथा।
विकल्पे यो यमे वायौ याने त्यागेऽपि मातरि॥ ३४
रः पावके च तीक्ष्णे च रादाने ग्रहणे मता।
रीर्गतौ हनने चोक्ता, रैः शब्दस्वर्णवित्तयोः॥ ३५
ल इन्द्रे च ह्लादने, ला ग्रहणे लोः स्मृताश्लिषि।
लूश्छेदे रस्तु, वाते स्यात् शान्तेऽपि वाः सुखे गतौ॥ ३६
वोः प्रभागभनवग्रास्ति क्षेपणेष्वदने मता।
वरुणे वं शकुन्तौ विर्ववावै वित्त अव्ययम्॥ ३७
ओष्ठ्यवं वहवः प्राहुर्दन्त्यवश्चेति केचन।
शः शम्भुः शं शुभं प्रोक्तं शीः स्वप्ने परिकीर्त्तिता॥ ३८
श्लाघ्यं पूजने प्रोक्तं शूर्हिंसायां प्रयुज्यते।
षः श्रेष्ठः कीर्त्तितोधीरैः षूस्तु गर्भविमोचनम्॥ ३९
सः स्याद्विष्णौ हरे दर्भे सा लक्ष्मीदुर्गयोर्मता।
अव्ययं सुस्फुटौ स्याद्धृ शार्थेऽनुमतावपि॥ ४०

हि-पाद पूरणे प्रश्ने सम्भ्रमेऽप्यवधारणे ।
हेतौ हेतूपदेशे च विशेषासूययोरपि ॥ ४४
ही विस्मये विषादे च दुःखे हेतौ च कीर्त्त्यते ।
हे सम्बोधनआह्वानासूययोश्च प्रयुज्यते ॥ ४५
हैहो चाह्वान सम्बुद्धो र्हौ शब्देऽपि तयोर्मतः ।
यद्यपि क्ष स्त्रिवर्णात्मा तथाप्येकोनिगद्यते ।
नामानुरोधात् षान्तोऽपि पृथगेव हि पठ्यते ॥ ४७
अन्ये विश्वप्रकाशादौ महेश्वर मुखैर्बुधैः ।
षान्ताः पृथङ्निबद्धास्ते षान्तवर्गे तु केश्चन ॥ ४८
ख्यातानामेकवर्णानामर्थानां कियतां कृतः ।
संग्रहोऽयं परे त्वर्था ज्ञेयास्तन्त्रान्तरेक्षणात् ॥ ४९

इति श्रीपाद्ममल्लिकात्मजश्रीभरतसेनकृतएकवर्णार्थ
संग्रहः समाप्तः ।
